No. २३९४ क

Title श्रीचक्रभावनोपनिषत्

Author

Extent ६ पत्र Age

Subject तन्त्र

[redacted]

नं० ३[redacted]

३४

[redacted]

# 5864

Contd



श्रीः

ॐ श्रीगणेशाय नमः ॥ ॐ पूर्णमदः पूर्णमिदं पूर्णा

ॐ· त्पूर्णमदुच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशि

१ ष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ॐ आत्मानमख

ण्डमण्ड[illegible]कार मावृत्य सकल ब्रह्माण्ड मण्डलं

स्वप्रकाशमयं ध्यायेत् ॥ श्रीगुरुः सर्वकारणभूता

शक्तिः ॥ तेन नवरन्ध्ररूपो देहः ॥ नवशक्तिरूपं श्री

चक्रम्॥ वाराहीपितृरूपा॥कुरुकुल्लावलीदेवतामा
ता॥ पुरुषार्थाः सागराः॥ देहोनवरत्नद्वीपः॥त्वगादि
सप्तधातुरोमसंयुक्ताः सङ्कल्पाः कल्पतरवः॥ तेजः
कल्पको द्यानं॥रसनयाभाव्यमाना मधुराम्ललव
णतिक्तकटुकषायाः षड्रसाः षडृतवः॥ज्ञान
मग्निः॥ज्ञेयं हविः॥ज्ञानज्ञातृज्ञेयानामभेदभाव

ॐ. नंश्री चक्रपूजनम् ॥ नम इतिसहिताः अङ्कारादयो नव
रसाः ॥ अणिमाद्या अष्टसिद्धयः ॥ कामक्रोधलोभ
२ मोहमदमात्सर्य पुण्य पापाद्या ब्राह्म्याद्याष्टशक्तयः ॥
2 आधारञ्चक्रंमुद्राशक्तयः ॥ पृथिव्यप्तेजोवायुराका
श शब्दस्पर्शरूप रस गन्ध वाक् पाणि पाद पायूपस्थ
रसनेन्द्रियाणि विकाराः ॥ कामाकर्षिण्याद्याः षोडश

शक्तयः वचनादानगमनविसर्गानन्दादानोपादानोपे
दया अनङ्गकुसुमाद्याष्टसिद्धयः ॥ पूषाअलंवा कुहु
विश्वोदरी वरुणा हस्तिजिह्वा यशोवती गान्धारी पुरु
षा शंखिनी सरस्वती इडा पिङ्गला सुषुम्ना... चतु
र्दशनाड्यः ॥ सर्वसंक्षोभिण्यादि चतुर्दशारगा देव
ताः ॥ प्राणापानव्यानोदानसमाननागकूर्मकृकल

ॐ० देवदत्तधनञ्जय इति दशवायवः सर्वसिद्धिप्रदा दिव
हिर्दिशारगादेवताः॥ एतद्वायुसंसर्गोपाधिभेदेन रेच
२ कःशोषकोदाहकः प्लावकःस्रावक इति प्राणमुख्य
3 त्वेन ... न्दिति॥ दारको ज्ञारकः क्षोभको मो
हक इत्यपानमुख्यत्वेन पञ्चविधोऽस्ति तेन मनु
ष्याणां देहगाः॥ भक्ष्यभोज्य लेह्यचोष्यपेयात्म

२

कं चतुर्विधमन्नम्पाचयति एतद्दशकं वह्निकलाः सर्व
ज्ञाद्यन्तर्दशारगा देवताः॥ शीतोष्णसुखदुःखेच्छा स
त्त्वरजस्तमोगुणा इति वशिन्यादिशक्तयोष्टौ॥ शब्द
स्पर्शरूपरसगन्धाः पञ्चतन्मात्राः॥ [illegible]
मन इक्षु धन्व रागपाशो द्वेषोङ्कुशः॥ अव्यक्तमहत्तत्व
महदहङ्कार इति कामेश्वरी वज्रेश्वरी भगमालिन्यन्तस्त्रि

ओं॰ कोणाग्रगादेवताः॥पञ्चदशातिथिनित्यास्तुत्रानिरूपा
५ धिकाचसादेवताकामेश्वरीसदानन्दस्वरूपा॥सदान
५ न्दपरिपूर्णस्वात्मैक्यपरदेवताललिता॥सलिल
निधिसालिलेकरसत्वम्॥प्रतिनामिकर्तव्यमकर्तव्य
मुपचारः॥तस्यवाह्यान्तःकरणमेकीकृत्यस्थिरासनं
रामस्तुलयोरेकीकरणंपाद्यं॥उज्जलदानन्दानुसं

ध्यानमित्याचमनं ॥ चिच्चन्द्रमसि सर्वाङ्गः स्रवणमिति स्ना
नम् ॥ चिदग्निस्वरूपं चिदानन्दस्वरूपं परानन्दस्फुरणमि
ति वस्त्रम् ॥ प्रत्येकं सप्तविंशति धाम भिन्नत्वा[illegible]नकि
मात्मके कृतानं क्रियात्मकब्रह्मसूत्रि[illegible]
स्वनाडीसूत्रं सव्यतिरिक्तवस्तुसङ्गृहीतस्मरणं विमृश
णम् ॥ साक्षित्सुखपरिपूर्णानुस्मरणं गन्धम् ॥ समस्त

ॐ:
५
5

विषयानांमनःस्थैर्येणानुसन्धानं कुसुमम् ॥ तेषामेव
सर्वदाऽस्वीकरणमिति धूपपवनः ॥ अनवच्छिन्नोच्च
लत्त्वचित्प्रकाशोदीपः ॥ समस्तद्वैताऽद्वैतविसर्जनं नैवे
द्यम् ... यामेकीकरणं ताम्बूलम् ॥ मूला
धारादि ब्रह्मरन्ध्रपर्यन्तं ब्रह्मरन्ध्रादिमूलाधारपर्यन्तं
गतागतरूपेण प्रदक्षिणा ॥ सर्वदावस्था तुरीयानम

५

स्कारः देहस्यान्यत्र यमावृत्यानिमज्जनं बलिहरणम्
सत्यमास्तिनास्तिकर्त्तव्यमकर्त्तव्यमुदासीनमित्यात्मनि
विलापनं होमः॥ स्वयन्तत्पादुकानिमज्जनं परिपूर्णं
ध्यानम्॥ एवं मुहूर्त्तत्रयं मुहूर्त्तद्वयं [illegible]
घटिकामात्रं भावनापरो जीवन्मुक्तो भवति॥
तस्य चिन्तितकार्याण्ययत्नेन सिद्ध्यन्ति स्वयमे

ॐ
६

वशिवयोगीतिकथ्यते कादिहादीनामव लोके भाव
नापरोजीवन्मुक्तो भवति ॥ इत्युपनिषद् ॥ ॐ पूर्णम
दः पूर्णमिदमितिपठेत् ॥ श्रीचक्रभावनोपनि
षत्सम्पूर्णम् ।

१९५० चैत्रशुक्लैकादश्याम्
भौमे शुभम्भवतु ॐ शान्तिः ३

६